This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह

दाखल क्र M664 विषय व्याकरण.
नाव. प्रयोग ग्रंथ MS.
लेखक/लिपीकार —.
पृष्ठ 9 काळ — पूर्ण/~~अपूर्ण~~

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection



श्रीगणेशायनमः ॥ अथप्रयोगलिख्यते ॥ प्रयोगस्त्रिविधः कर्त्तरिप्रयोगकर्मणिप्रयोग भावेप्रयोगभेदेन
तत्रकर्तरिप्रयोगस्त्रिविधः सकर्मकाकर्मकोद्विकर्मकश्चेति तत्रसकर्मकोयथा ॥ कृष्णोभक्तान्रक्षति ॥
अकर्मकोयथा ॥ कृष्णस्तिष्ठति द्विकर्मकोयथा ॥ कृष्णोगोपालान्मथुरांनयति कर्मणिप्रयोगोपिद्विविधः
एककर्मकोद्विकर्मकश्चेति एककर्मकोयथा विष्णुनाप्रपंचःक्रीयते द्विकर्मकोयथा द्विकर्मकधातुयोगे द्वि
कर्मककर्मणिप्रयोगोभवति सयथा नगरंनियतेनागरिकैर्वनेचरः भावेप्रयोगयथा सचाकर्मकधातु
योगएवभवति ॥ कृष्णेनस्थीयते इतिप्रयोगविधिः कर्त्तरिप्रथमाचेत्स्याद्द्वितीयातर्हिकर्मणि उक्तक
र्तृप्रयोगेयंयथाधातुस्तथापदं ॥ तृतीयाकर्त्तरिचेत्स्यात्प्रथमातर्हिकर्मणि ॥ उक्तकर्मप्रयोगेयंनपर
स्मैपदंतदा ॥ कर्तीकर्मचकरणंक्रियापितदनंतरं विशेषणंविशेष्यस्यव्याख्यानेचक्रमाद्यथा ॥
विशेष्यंयल्लिंगवचनंविशेषणमपितथा यस्यसाहचर्यंदीयतेतदुपमानं साहचर्याधिकरणमुपमेय

यथामुखस्योपमानंचंद्रः ॥ चंद्रस्योपमेयंमुखं ॥ उपसर्गेणधात्वर्थोबलादन्यत्रनीयते ॥ प्रहाराहार संहा
रविहार परिहारवत् ॥ इतिप्रयोगसमासः ॥ अथकारिकालिख्यते ॥ बालमित्रप्रबोधायलघुरामंसलक्ष्मणं ॥
श्लोकयोजनिकोपायंलघुरामस्तनोतिनं १ युष्मदस्मत्प्रयोगाभ्यांभिन्नामाभिधीयते ॥ नामयुष्मत्तथा
चास्मत्कर्त्तरीत्यभिधीयते २ आद्यमध्योत्तमैः पुंभिर्योजनीयाःप्रयत्नतः ॥ नामकर्त्तरिचाद्यस्यक्रिया
पुंसःप्रयुज्यते ३ युष्मत्कर्त्तरिमध्यस्यपुंसः क्रियापदंभवेत् ॥ अस्मत्कर्त्तृपदेचस्यादुत्तमस्यक्रिया
पदं ४ एकद्विबहुवाक्यस्थःकर्त्तासर्वत्रगीयते ॥ एकद्विबहुवाक्यस्थाःक्रियायोजास्तथाततः ॥५॥
क्वचित्क्रियापदंनस्यात्कर्तृसत्वेतदाहरत् ॥ क्वचित्कर्तृपदासत्वेक्रियासत्वेतदाहरत् ६ प्रथमांतोय
दाकर्त्ताप्रत्ययस्तत्कर्तृकः ॥ समप्रत्ययकस्तत्रद्वितीयानुक्तकर्मणि ७ प्रथमांतोयदाकर्त्ताद्वितीया
कर्मणिभवेत् ॥ तृतीयांतोयदाकर्त्ताप्रथमाकर्मणिभवेत् ८ प्रथमांतंयदाकर्मप्रत्ययस्तूक्तकर्म ॥१॥

कः समप्रत्ययकस्तत्रतृतीयानुक्तकर्त्तरि ९ कर्तृकर्मक्रियास्तावत्श्लोकेयाआस्तनःपरं ॥ किमारू
पंपुरस्कृत्यतृतीयादिनियोजयेत् १० त्र्यवंतंचतुवंतंचक्रांतंकर्मविभूषितं ॥ अन्वयस्थपदानांच
यथालिंगंविशेषणं ११ यथाविभक्तिवाक्यंचबालानांहितकाम्यया ॥ लघुरामकृताह्येताःकारिका
द्वयंचैककाः १२ इतिकारिकासमाप्तः ॥ अथकारकलिख्यते ॥ चकारबहुलाद्द्वंद्वःसचासौकर्मधारयः
येनयस्यबहुव्रीहिःशेषास्तत्पुरुषामताः १ अथकारकनिरूपणं ॥ कर्त्ताकर्मचकरणंसंप्रदानंतथैवच ॥
अपादानाधिकरणमित्याहुःकारकाणिषट् २ लिंगवचनपरिमाणसंबोधनपूर्वकर्तृकर्मणोःप्रथमा
लिंगंयथा ॥ कृष्णः स्त्रीः ज्ञानं वचनं यथा ॥ एकं द्वे बहूनि परिमाणंयथा ॥ खारी द्रोणः आढ
कं संबोधनंयथा ॥ हेराम हेरामौ हेरामाः ॥ उक्तकर्तृदाहरणंयथा ॥ यजमानोगांहस्तेन ब्राह्मणायगो
समुदायात्स्वस्यनर्मदातीरेददाति ॥ उक्तकर्मदाहरणंयथा ॥ भिन्नःशरेणरामेणरावणोलोकरावणः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥२॥

करागेणविदीर्णोपिवानैरर्युध्येतपुनः १ उक्तकर्त्तृदाहरणं सर्वेष्वपिकारकेषूपयुक्तं अनुक्तकर्मणिस्मृ
तौधिगुपरिसमयानिकषायोगेअभिसर्वतसोः कालाध्वनोरत्यंतसंयोगे विनांतरांतरेणादियोगे
द्वितीया २ अनुक्तकर्मोदाहरणंयथा रामोराजंबभूवे स्मृत्युदाहरणंयथा मातरंस्मरतिशिशुः
धिक्देवदत्तंजीवति पुरोहितमुपर्युपर्याचकाःपतंति समयाग्रामंतीर्थं लंकान्निकषाहतोरावणः
अभितोमाहिष्मतींरेवावहती सर्वतःकाशींवनानिसंति मासंगुडधानाः क्रोशंकुटिलानदी रामं
विनानजीवामी अंतरात्वांमांमधुरिपुः अंतरेणाक्षिणिकिंजीवितेन अनुक्तकर्त्तरिकरणेविनादि
योगेहेतौसहादियोगेतृतीया अनुक्तकर्त्तुःकरणस्यचोदाहरणं रामेणशरेणहतोबाली
पापेनविनासर्वंफलति शब्दोनित्यःकृतकत्वेन सहशिष्येणागतोगुरुः समंचंद्रेणोदितोगुरुः
साकंनयनाभ्यांश्लक्ष्णादंताः दानपात्रेसंप्रदानेतादर्थेनमःस्वस्तिस्वाहा स्वधालंवषट्योगे ॥२॥

क्रुधिकुपिद्रुह्यादियोगेचतुर्थी ४ वेदविदेगांददातिरामः रामोवनायप्रवृत्तः नमोनारायणाय
स्वस्तिराज्ञे सोमायस्वाहा पितृभ्यःस्वधा अलंमल्लोमल्लाय इंद्रायवषट् क्रुरायक्रुध्यति मि
त्रायकुप्यति कंसायद्रुह्यतिकृष्णः गुणवतेसूयतेमंदः अपादानेविश्लेषावधौऋतादियो
गेहेतौभयहेतौचपंचमी ५ ब्रम्हणःप्रकृतिरुत्पन्ना हिमवतोवतरतिगंगा धावतोश्वादप
तत् ऋतेज्ञानान्नमुक्तिः वायुःप्रत्यक्षःस्पर्शाश्रयत्वात् चोराद्बिभेति संबंधेस्मृतौहेतुप्र
योगेनिर्धारणेस्वाम्यादियोगेदानपात्रेसंप्रदाने अनादरेचषष्ठी राज्ञःपुरुषः मातुःस्मरतिशि
शुः अन्नस्यहेतोःकन्यावसति गवांकृष्णागौःसंपन्नक्षीरा गवांस्वामीदेशस्याधिपतिः
राज्ञोदंडंददातिदंड्यः बहुनांक्रोशतांगतश्चोरः अधिकरणेनादरेस्वाम्यादियोगनिमित्ते
भावेचसप्तमी ७ भक्तानांमनोरामेरंजति बहुष्वसाधुषुनिवारयत्स्वपिस्वमार्योयातिसाधू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥३॥

मार्गेण हैहयेष्वीषः कार्त्तवीर्यः विघ्नो गच्छति श्रीशेपूजिते चर्मणि द्वीपिनं हंति दंतयोर्हं
ति कुंजरं केशेषु चमरीं हंति सीम्नि पुष्कलको हतः ८ इति कारकसमाप्तः अथ समासच
क्रलिख्यते षोढा समासाः संक्षेपादष्टाविंशतिधा पुनः नित्यानित्यत्वयोगेन लुगलुक्त्वेन च द्विधा
तत्राष्टधा तत्पुरुषः सप्तधा कर्मधारयः सप्तधा च बहुव्रीहिर्द्विगुः संभाषितो द्विधा द्वंद्वश्चतुर्विधो
ज्ञेयो व्ययीभावो द्विधा मतः तेषां पुनः समासानां प्राधान्यं स्याच्चतुर्विधं षोढा समासाः कथं
तत्पुरुषः कर्मधारयो बहुव्रीहिर्द्विगुर्द्वंद्वो व्ययीभावश्चेति षड्विधः तत्राष्टधा तत्पुरुषः कथं प्रथ
मादिसप्तम्यंतः नञ्तत्पुरुषश्चेति प्रथमा तत्पुरुषो यथा पूर्वः कायः पूर्वकायः १ द्वितीया
तत्पुषो यथा कृष्णं श्रितः कृष्णः श्रितः २ तृतीया तत्पुरुषो यथा रामेण हतः रामहतः ३
चतुर्थी तत्पुरुषो यथा कुंडलाय हिरण्यं कुंडलहिरण्यं ४ पंचमी तत्पुरुषो यथा सिंहात् भयं सिं

॥३॥

ह भयं ५ षष्ठी तत्पुरुषो यथा राज्ञः पुरुषः राजपुरुषः ६ सप्तमी तत्पुरुषो यथा अक्षेषु शौंडः अक्ष
शौंडः ७ नञ्तत्पुरुषो यथा नब्राम्हणः अब्राम्हणः तदन्यतद्विरुद्धतद्भावेन यप्रवर्तते ॥ धर्मादन्यो
अधर्मः धर्मविरोधी अधर्मः धर्माभावो अधर्मः इति तत्पुरुषः समाप्तः अथ सप्तधा कर्मधारयः
कथं विशेषणपूर्वपदो विशेष्यपूर्वपदो विशेषणोभयपद उपमान् पूर्वपद उपमानोत्तरपदः संभावना
पूर्वपदोवधारणापूर्वपदश्चेति विशेषणपूर्वपदः कर्मधारयो यथा नीलं च तत् उत्पलं च नीलोत्पलं
विशेष्यपूर्वपदः कर्मधारयो यथा वैय्याकरणश्चासौ खसूचिश्च वैय्याकरणखसूचिः विशेषणो
भयपदः कर्मधारयो यथा शीतं च तत् उष्णं च शीतोष्णं जलं उपमानपूर्वपदः कर्मधारयो यथा
शंख इव पांडुरः शखपांडुरः उपमानोत्तरपदः कर्मधारयो यथा मुखं पद्ममिव मुखपद्मं संभा
वनापूर्वपदः कर्मधारयो यथा गुण इति बुद्धिः गुणबुद्धिः इति सप्तधा कर्मधारयः अथ सप्तधा बहु

अवधारणापूर्वपदः कर्मधारयो यथा
सुकृतमेव बंधुः सुकृतबंधुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्रीहिः कथं ॥ द्विपदो बहुपदः संख्योभयपदः संख्योत्तरपदः सहपूर्वपदः कर्मव्यतिहारलक्षणो दि
गंतराललक्षणश्चेति ॥ द्विपदो बहुव्रीहिर्यथा ॥ आरूढो वृक्षो येन सः आरूढवृक्षः १ बहुपदो
बहुव्रीहिर्यथा ॥ पराक्रमेणोपार्जिताः संपदो यैस्ते पराक्रमोपार्जितसंपदः २ संख्योभयपदो
बहुव्रीहिर्यथा ॥ द्वौ वा त्रयो वा संख्या येषां ते द्वित्राः ३ संख्योत्तरपदो बहुव्रीहिर्यथा ॥ दशानां
समीपे उपदशाः सहपूर्वपदो बहुव्रीहिर्यथा ॥ मूलेन सह उद्धृतस्तरुर्येनासौ समूलोद्धृत
तरुः ५ कर्मव्यतीहारलक्षणो बहुव्रीहिर्यथा ॥ दंडैश्च दंडैश्च गृहीत्वा इदं युद्धं प्रवर्तते इ
ति दंडादंडी ६ दिगंतरालो लक्षणो बहुव्रीहिर्यथा ॥ दक्षिणस्याश्च पूर्वस्याश्च दिशोर्यदं
तरालं सा दक्षिणपूर्वा दिक् ॥ इति सप्तधा बहुव्रीहिसमाप्तः ॥ अथ द्विगुर्द्विधा कथं ॥ एकवद्भाव्य
नेकवद्भावी चेति ॥ एकद्भावी द्विगुर्यथा ॥ संख्यापूर्वो द्विगुः ॥ त्रयाणां भुवनानां समाहारस्त्रिभुव

नं ॥ पंचानां वटानां समाहारः पंचवटी ॥ अनेकवद्भावी द्विगुर्यथा ॥ त्रयो लोकास्त्रिलोकाः इति द्वि
धा द्विगुः द्वंद्वः श्चतुर्विधः कथं ॥ समुमुच्चयान्वाचयोतरेतरयोगसमाहाराश्चेति ॥ समुच्चया
य न्वाचयोः समासो नास्ति ॥ समुच्चयो द्वंद्वो यथा ॥ देवदत्तो यज्ञदत्तश्च विवादं कुरुतः ॥ अन्वा
चयो द्वंद्वो यथा ॥ वटो भिक्षामटगां चानय शुक्लां दंडेनेति ॥ इतरेतरयोगद्वंद्वो यथा ॥ रामश्च
लक्ष्मणश्च रामलक्ष्मणौ ॥ समाहारो द्वंद्वो यथा ॥ शंखश्च पटहश्च शंखपटहं ॥ इति चतुर्वि
धो द्वंद्वः ॥ अथ व्ययीभावो द्विधा कथं ॥ नामपूर्वपदो अनामपूर्वपदश्चेति ॥ नामपूर्वपदो व्य
यीभावो यथा ॥ हरौ अधीत्य धीहरि ॥ अनामपूर्वपदो व्ययीभावो यथा ॥ उन्नता गंगा यस्मिन्
देशे इत्युन्नतगंगं ॥ इत्यव्ययीभावो द्विधा समाप्तः ॥ अथ चतुर्विधं प्राधान्यं कथं ॥ पूर्वपदा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थे प्रधानोऽव्ययीभावः उत्तरपदार्थप्रधानस्तत्पुरुषः द्विगुकर्मधारयोऽपि तत्पुरुषभेदौ अन्यपदार्थ
प्रधानो बहुव्रीहिः उभयपदार्थप्रधानो द्वंद्वः इतिचतुर्विधं प्राधान्यं समासावबोधकंवाक्यं
विग्रहः लुगलुक्चनचद्विधाकथं लुक्समासो अलुक्समासश्चेति लुक्समासोयथा
राज्ञःपुरुषः राजपुरुषः अलुक्समासोयथा वनेचरतीतिवनेचरः इतिसमाससमाप्तः
अथधातुलिख्यते धातुप्रकरणेदशलकारेषुप्रथमंलकारं प्रथममध्यमोत्तमाः पुरुषाः
एकद्विबहुवचनवंतः धातवोपिपरस्मैपदिन आत्मनेपदिन उभयपदिनश्चेति तेपिसकर्मकाकर्म
कभेदेनद्विविधाः अकर्मकोपिकदाचित्सकर्मकनामनुभवत्युपसर्गबलात् नान्निप्रयुज्यमानप्र
थमपुरुषः युष्मद्मध्यमः अस्मद्युत्तमः लट् लिट् लुट् लृट् लेट् लोट् लङ् ॥५॥

लिंङ् लुङ् लृङ् एषुपंचमालकारः छंदमात्रगोचरः परस्मैपदिरूपं भूसत्तायांपरस्मैपदिवर्त्तमा
नेलट् भवति भवतः भवंति १ भवसि भवथः भवथ २ भवामि भवावः भवामः ३
परोक्षार्थेलिट् बभूव बभूवतुः बभूवुः १ बभूविथ बभूवथुः बभूव २ बभूव
बभूविव बभूविम ३ भविष्यदनद्यतनेलुट् भविता भवितारौ भवितारः १ भवितासि
भवितास्थः भवितास्थ २ भवितास्मि भवितास्वः भवितास्मः ३ शेषेभविष्यतिलृट् भवि
ष्यति भविष्यतः भविष्यंति १ भविष्यसि भविष्यथः भविष्यथ २ भविष्यामि भविष्यावः
भविष्यामः ३ लेट् वेदेप्रसिद्धः लिंगर्थेलोट् भवतु भवतात् भवतां भवंतु १ भव
भवतात् भवतं भवत २ भवानि भवाव भवाम ३ भूतानद्यतनेलङ् अभवत् अभवतां
अभवन् १ अभवः अभवतं अभवत २ अभवं अभवाव अभवाम ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विध्याशिषोर्लिङ् भवेत् भवेतां भवेयुः १ भवेः भवेतं भवेत २ भवेयं भवेव भवेम २
दृतिविधो आशिषिलुङ् भूयात् भूयास्तां भूयासुः १ भूयाः भूयास्तं भूयास्त २ भूयासं
भूयास्व भूयास्म २ भूतार्थेलुङ् अभूत् अभूतां अभूवन् १ अभूः अभूतं अभू
त २ अभूवं अभूव अभूम २ क्रियातिक्रमेलृङ् अभविष्यत् अभविष्यतां अभ
विष्यन् १ अभविष्यः अभविष्यतं अभविष्यत २ अभविष्यं अभविष्याव अभ
विष्याम २ परस्मैपदंसमाप्तं लडर्वर्तमानेलट्वेद भूतेलङ् लुङ् लिट् स्तथा विध्याशिषो
ष्यु लिङ् लोटौ लुट् लृटोच्च भविष्यति १ लृङ् क्रियातिक्रमेचैवलकारादश कीर्तिताः
भूधातावात्मनेपदिवर्तमानेलट् भवते भवेते भवेते १ भवसे भवेथे भवध्वे २ भवे
भवावहे भवामहे २ परोक्षार्थे लिट् बभूवे बभूवाते बभूविरे १ बभूविषे बभूवा

थे बभूविध्वे २ बभूवे बभूविवहे बभूविमहे २ भविष्यदनद्यतनेलुट् भविता भविता
रौ भवितारः १ भवितासे भवितासाथे भविताध्वे २ भवितास्वहे भवितास्महे
२ शेषभविष्यतिलृट् भविष्यते भविष्येते भविष्यंते १ भविष्यसे भविष्येथे भविष्य
ध्वे २ भविष्ये भविष्यावहे भविष्यामहे २ लडर्वेदेप्रसिद्धः लिङर्थेलोट् भवतां भवे
तां भवेतां १ भवस्व भवेथां भवध्वं २ भवै भवावहै भवामहै २ भूतानद्यतनेलङः
अभवत अभवेतां अभवन १ अभवथाः अभवेथां अभवध्वं २ अभवे अभवा
वहि अभवामहि २ विध्याशिषोर्लिङ् भवेत भवेयातां भवेरन् १ भवेथाः भवेया
थां भवेध्वं २ भवेय भवेवहि भवेमहि २ दृतिविधौ आशिषिलुङ् भविषीष्ट भवि
षीयास्तां भविषीरन् १ भविषीष्ठाः भविषीयास्तां भविषीध्वं २ भविषीय भविषीवहि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥७॥

भविषीमहि ३ भूतार्थे लुङ् अभविष्ट अभविषातां अभविषत् १ अभविष्ठाः
अभविषाथां अभविढ्वं २ अभविषि अभविष्वहि अभविष्महि ३ क्रियातिक्रमे
लृङ् अभविष्यत् अभविष्येतां अभविष्यंत् १ अभविष्यथाः अभविष्येथां अ
भविष्यध्वं २ अभविष्ये अभविष्यावहि अभविष्यामहि ३ असभुवि परस्मैपदि
वर्तमाने लट् अस्ति स्तः संती १ असि स्थः स्थ २ अस्मि स्वः स्मः ३ लिट्
आस असतुः आसुः १ आसिथ आसथुः आस २ आस आसिव आसिम ३
लुट् लृट् भू धातुवत् जाणावेत् लेट् वेदे प्रसिद्धः लिंगार्थे लोट् अस्तु स्ता स्तां संतु १
एधि स्तात् स्तं स्त २ असानि असाव असाम ३ लङ् आसीत् आस्तां
आसन् १ आसीः आस्तं आस्त २ आसं आस्व आस्म ३ लिङ्

॥७॥

स्यात् स्यातां स्युः १ स्याः स्यातं स्यात २ स्यां स्याव स्याम ३ लुङ् इति धातु
समाप्तः दुह्याच्पच्दंडरुधिपृच्छि चिब्रूषीसुमंथमुषां कर्मयुक्स्यादकथितं जि
तथा स्यान्नीहृकृष्वहां दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णामकथितं का
रकं कर्मसंज्ञं स्यात् दुहप्रपूरणे अयं धातुरुभयपदी दोग्धि दुग्धः दुहंति १ धोक्षि
दुग्धः दुग्ध २ दोह्मि दुह्वः दुह्मः ३ अथात्मनेपदं दुग्धे दुहाते दुहते १ धुक्षे
धु दुहाथे दुग्ध्वे २ दुहे दुह्वहे दुह्महे ३ याचृयांचायां याचति याचते डुपचष्पाके
पचति पचते दंडदंडने दंडयति दंडयते रुधिरावरणे रुणद्धि रुंधः रुंधंति १
रुणत्सि रुंधः रुंध २ रुणह्मि रुंध्वः रुंध्मः ३ रुंधे रुंधाते रुंधते १ रुंत्से रुं
धाथे रुंधध्वे २ रुंधे रुंध्वहे रुंध्महे ३ पृच्छ ज्ञीप्सायां वाची पृच्छति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥८॥

पृच्छते ॥ चिञ् चयने ञित्वात्तद्वये चयनमत्रसंग्रहः ॥ अयंमुभयपदी ॥ चिनोति ॥ चिनुतः
चिन्वंति १ चिनोषि ॥ चिनुथः ॥ चिनुथ ॥ २ ॥ चिनोमि ॥ चिन्वः ॥ चिन्मः ॥ ३ ॥ ब्रूञ् व्यक्तायां
वाचि ॥ ञित्वादुभयपदी ॥ ब्रवीति ॥ ब्रूतः ॥ ब्रुवंति ॥ १ ॥ ब्रवीषि ॥ ब्रूथः ॥ ब्रूथ ॥ २ ॥ ब्रवीमि ॥ ब्रूवः ॥
ब्रूमः ॥ ३ ॥ ब्रूते ॥ ब्रूवाते ॥ ब्रूवंते ॥ १ ॥ ब्रूषे ॥ ब्रूवाथे ॥ ब्रूवध्वे ॥ २ ॥ ब्रूवे ॥ ब्रूवहे ॥ ब्रूमहे ॥ ३ ॥ शासु अनुशिष्टौ
शास्ति ॥ शिष्टः ॥ शासति ॥ १ ॥ शास्सि ॥ सिष्टः ॥ शिष्ट ॥ २ ॥ शास्मि ॥ शिष्वः ॥ शिष्मः ॥ ३ ॥
मंथविलोडने ॥ मथ्नाति ॥ मथ्नते ॥ जिजये ॥ जयति ॥ जयते ॥ मुषस्तेये ॥ मुष्णाति ॥ मुष्णीतः ॥
मुष्णंति ॥ १ ॥ मुष्णासि ॥ मुष्णीथः ॥ मुष्णीथ ॥ २ ॥ मुष्णामि ॥ मुष्णीवः ॥ मुष्णीमः ॥ ३ ॥
णिञ् प्रापणे ॥ उभयपदी ॥ नयति ॥ नयते ॥ हृञ् हरणे ॥ हरति ॥ हरते ॥ कृषविलेखने ॥ कृष्यति

॥८॥

॥९॥

कृष्यते ॥ वह प्रापणे ॥ वहति ॥ वहते ॥ इति द्विकर्मकाः ॥ इति धातुसमाप्तः ॥ अथोपसर्गलि
ख्यते ॥ प्र ॥ परा ॥ अप् ॥ सम् ॥ अनु ॥ अव ॥ निस् ॥ निर् ॥ दुस् ॥ दुर् ॥ वि ॥ आङ् ॥ नि ॥
अधि ॥ अपि ॥ अति ॥ सु ॥ उत् ॥ अभि ॥ प्रति ॥ परि ॥ उप ॥ इति द्वाविंशति उपसर्गाः ॥
संपूर्णमस्तु ॥ शुभं भवतु ॥ श्रीगणेशार्पणमस्तु ॥ संवत् १९३५ ॥ शके १८०० ॥ ज्येष्ठवद्य
॥ ८ ॥ अष्टमी ॥ रविवासरे ॥ तद्दिने ग्रंथ समाप्तः ॥ इदं पुस्तकं बाळंभटेन लिखितं ॥ स्वार्थ
परोपकारार्थंच ॥ ५ ॥ छ ॥ कृष्णार्पणमस्तु ॥ ॥ लज्जा सत्तास्थिति जागरणं वृद्धिक्ष
यभय जीवितमरणं ॥ शयनक्रीडारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः ॥ १ ॥ फलव्यापारयोः
एकाधिकरणत्वं अकर्मकत्वं ॥ भिन्नाधिकरणत्वं सकर्मकत्वं ॥ १ ॥ श्रीगुरुमूर्तीयेनमः ॥

॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=16.09.19 16:02
,TRANSFERRED=2019/09/16 at 16:06:45
,PAGES=10
,TYPE=STD
,NAME=S0001850
,Book Name=M-664-PRAYOG GRANTH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection